श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ३५

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ३५

*श्रीरामचरितवर्णनम्*

नीतस्सुग्रीवमैत्रीं तदनु हनुमता दुन्दुभेः कायमुच्चैः
    क्षिप्त्वाङ्गुष्ठेन भूयो लुलुविथ युगपत् पत्रिणा सप्त सालान्।
हत्वा सुग्रीवघातोद्यतमतुलबलं बालिनं व्याजवृत्त्या
    वर्षावेलामनैषीर्विरहतरलितस्त्वं मतङ्गाश्रमान्ते॥ १॥

सुग्रीवेणानुजोक्त्या सभयमभियता व्यूहितां वाहिनीं ता-
    मृक्षाणां वीक्ष्य दिक्षु द्रुतमथ दयितामार्गणायावनम्राम्।
सन्देशं चाङ्गुलीयं पवनसुतकरे प्रादिशो मोदशाली
    मार्गे मार्गे ममार्गे कपिभिरपि तदा त्वत्प्रिया सप्रयासैः॥ २॥

त्वद्वार्ताकर्णनोद्यद्गरुदुरुजवसम्पातिसम्पातिवाक्य-
    प्रोत्तीर्णार्णोधिरन्तर्नगरि जनकजां वीक्ष्य दत्वाऽङ्गुलीयम्।
प्रक्षुद्योद्यानमक्षक्षपणचणरणः सोढबन्धो दशास्यं
    दृष्ट्वा प्लुष्ट्वा च लङ्कां झटिति स हनुमान् मौलिरत्नं ददौ ते॥ ३॥

त्वं सुग्रीवाङ्गदादिप्रबल कपिचमूचक्रविक्रान्तभूमि-
    चक्रोऽभिक्रम्य पारेजलधि निशिचरेन्द्रानुजाश्रीयमाणः।
तत्प्रोक्तां शत्रुवार्तां रहसि निशमयन् प्रार्थनापार्थ्यरोष-
    प्रास्ताग्नेयास्त्रतेजस्त्रसदुदधिगिरा लब्धवान् मध्यमार्गम्॥ ४॥

कीशैराशान्तरोपाहृत गिरिनिकरैः सेतुमाधाप्य यातो
    यातून्यामर्द्य दंष्ट्रानखशिखरिशिलासालशस्त्रैः स्वसैन्यैः।
व्याकुर्वन् सानुजस्त्वं समरभुवि परं विक्रमं शक्रजेत्रा
    वेगान्नागास्त्रबद्धः पतगपतिगरुन्मारुतैर्मोचितोऽभूः॥ ५॥

www.prapatti.com

सौमित्रिस्त्वत्र शक्तिप्रहृतिगलदसुर्वातजानीतशैल-
    घ्राणात् प्राणानुपेतो व्यकृणुत कुसृतिश्लाघिनं मेघनादम्।
मायाक्षोभेषु वैभीषणवचनहृतस्तम्भनः कुम्भकर्णं
    सम्प्राप्तं कम्पितोर्वीतलमखिलचमूभक्षिणं व्यक्षिणोस्त्वम्॥ ६॥

गृह्णन् जम्भारिसम्प्रेषितरथकवचौ रावणेनाभियुद्ध्यन्
    ब्रह्मास्त्रेणास्य भिन्दन् गलततिमबलामग्निशुद्धां प्रगृह्णन्।
देवश्रेणीवरोज्जीवितसमरमृतैरक्षतैर्ऋक्षसङ्घै-
    र्लङ्काभर्त्रा च साकं निजनगरमगाः सप्रियः पुष्पकेण॥ ७॥

प्रीतो दिव्याभिषेकैरयुतसमधिकान् वत्सरान् पर्यरंसी-
    र्मैथिल्यां पापवाचा शिव! शिव! किल तां गर्भिणीमभ्यहासीः।
शत्रुघ्नेनार्दयित्वा लवणनिशिचरं प्रार्दयः शूद्रपाशं
    तावद्वाल्मीकिगेहे कृतवसतिरुपासूत सीता सुतौ ते॥ ८॥

वाल्मीकेस्त्वत्सुतोद्गापितमधुरकृतेराज्ञया यज्ञवाटे
    सीतां त्वय्याप्तुकामे क्षितिमविशदसौ त्वं च कालार्थितोऽभूः।
हेतोः सौमित्रिघाती स्वयमथ सरयूमग्ननिश्शेषभृत्यैः
    साकं नाकं प्रयातो निजपदमगमो देव वैकुण्ठमाद्यम्॥ ९॥

सोऽयं मर्त्यावतारस्तव खलु नियतं मर्त्यशिक्षार्थमेवं
    विश्लेषार्तिर्निरागस्त्यजनमपि भवेत् कामधर्मातिसक्त्या।
नो चेत् स्वात्मानुभूतेः क्व नु तव मनसो विक्रिया चक्रपाणे
    स त्वं सत्त्वैकमूर्ते पवनपुरपते व्याधुनु व्याधितापान्॥ १०॥

**********